


॥ श्री-जयेन्द्र-सरस्वती-श्रीचरण-लघु-पूजा-पद्धतिः ॥

हर हर शङ्कर ॐ जय जय शङ्कर





श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्री-जयेन्द्र-सरस्वती-श्रीचरण-लघु-पूजा-पद्धतिः ॥

**५१२८ पराभवः-कटकः-१५ / शाङ्कर-संवत्सरः २५३५ (३१.७.२०२६)**

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

प्राणान् आयम्य। ॐ भूः + भूर्भुवः सुवरोम्।

(अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **दक्षिणायने ग्रीष्म**-ऋतौ

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

**कटक**-**आषाढ**-मासे **कृष्ण**-पक्षे **द्वितीयायां** शुभतिथौ **भृगु**वासरयुक्तायां **श्रविष्ठा**-नक्षत्रयुक्तायां **सौभाग्य**-योगयुक्तायां **तैतिल**-करण (१०:०४; **गरजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **द्वितीयायां**शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थम्

- उत्तराषाढा-नक्षत्रे धनूराशौ आविर्भूतानां श्रीमत्-शङ्कर-विजयेन्द्र-सरस्वती-श्रीपादानां, शतभिषङ्-नक्षत्रे कुम्भ-राशौ आविर्भूतानां श्रीमत्-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीपादानाम् अस्माकं जगद्गुरूणां दीर्घ-आयुः-आरोग्य-सिद्ध्यर्थं,
- तैः सङ्कल्पितानां सर्वेषां लोक-क्षेमार्थ-कार्याणां वेद-शास्त्रादि-सम्प्रदाय-पोषण-कार्याणां विविध-क्षेत्र-यात्रायाश्च अविघ्नतया सम्पूर्त्यर्थं
- कामकोटि-गुरु-परम्परायां कामकोटि-भक्त-जनानाम् अचञ्चल-भावशुद्ध-दृढतर-भक्ति-सिद्ध्यर्थं, परस्पर-ऐकमत्य-सिद्ध्यर्थं
- भारतीयानां महाजनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां सन्ततेः सनातन-सम्प्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुम्बानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्री-जयेन्द्र-सरस्वती-श्रीचरण-प्रीत्यर्थं श्री-जयेन्द्र-सरस्वती-श्रीचरण-जयन्ती-महोत्सवे यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्री-जयेन्द्र-सरस्वती-श्रीचरण-पूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये।
[कलशपूजां कृत्वा।]

# ॥ ध्यानम् ॥

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पादशङ्करं लोकशङ्करम्॥

अज्ञानान्तर्गहन-पतितान् आत्मविद्योपदेशैः
त्रातुं लोकान् भवदवशिखा-तापपापच्यमानान्।
मुक्त्वा मौनं वटविटपिनो मूलतो निष्पतन्ती
शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्यरूपा॥

परित्यज्य मौनं वटाधःस्थितिं च
व्रजन् भारतस्य प्रदेशात् प्रदेशम्।
मधुस्यन्दिवाचा जनान् धर्ममार्गे
नयन् श्रीजयेन्द्रो गुरुर्भाति चित्ते॥

श्री-जयेन्द्र-सरस्वती-श्रीचरणान् ध्यायामि। श्री-जयेन्द्र-सरस्वती-श्रीचरणान् आवाहयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आसनं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्वागतं व्याहरामि। पूर्णकुम्भं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, पाद्यं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अर्घ्यं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आचमनीयं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मधुपर्कं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्नपयामि। स्नानानन्तरम् आचमनीयं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, वस्त्रं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, यज्ञोपवीतं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दिव्यपरिमलगन्धान् धारयामि। गन्धस्योपरि हरिद्राकुङ्कुमं समर्पयामि।

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्रीमज्जयेन्द्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः ॥

जयाख्यया प्रसिद्धेन्द्र-सरस्वत्यै नमो नमः
तमोपह-ग्राम-रत्न-सम्भूताय नमो नमः
महादेव-मही-देव-तनूजाय नमो नमः
सरस्वती-गर्भ-शुक्ति-मुक्ता-रत्नाय ते नमः
सुब्रह्मण्याभिधा-नीत-कौमाराय नमो नमः
मध्यार्जुन-गजारण्याधीत-वेदाय ते नमः
स्व-वृत्त-प्रीणिताशेषाध्यापकाय नमो नमः
तपोनिष्ठ-गुरु-ज्ञात-वैभवाय नमो नमः
गुर्वाज्ञा-पालन-रत-पितृ-दत्ताय ते नमः
जयाब्दे स्वीकृत-तुरीयाश्रमाय नमो नमः १०
जयाख्यया स्व-गुरुणा दीक्षिताय नमो नमः
ब्रह्मचर्यादेव लब्ध-प्रव्रज्याय नमो नमः
सर्व-तीर्थ-तटे लब्ध-चतुर्थाश्रमिणे नमः
काषाय-वासः-संवीत-शरीराय नमो नमः
वाक्य-ज्ञाचार्यो-पदिष्ट-महावाक्याय ते नमः
नित्यं गुरु-पद-द्वन्द्व-नति-शीलाय ते नमः
लीलया वाम-हस्ताग्र-धृत-दण्डाय ते नमः
भक्तोपहृत-बिल्वादि-माला-धर्त्रे नमो नमः
जम्बीर-तुलसी-माला-भूषिताय नमो नमः
कामकोटि-महापीठाधीश्वराय नमो नमः २०
सुवृत्त-नृ-हृदाकाश-निवासाय नमो नमः
पादानत-जन-क्षेम-साधकाय नमो नमः
ज्ञान-दानोत्क-मधुर-भाषणाय नमो नमः
गुरुप्रिया-ब्रह्मसूत्र-वृत्ति-कर्त्रे नमो नमः
जगद्गुरु-वरिष्ठाय महते महसे नमः
भारतीय-सदाचार-परित्रात्रे नमो नमः
मर्यादोल्लङ्घि-जनता-सुदूराय नमो नमः

सर्वत्र सम-भावाप्त-सौहृदाय नमो नमः
वीक्षा-विवशिताशेष-भावुकाय नमो नमः
श्री-कामकोटि-पीठाग्र्य-निकेताय नमो नमः ३०
कारुण्य-पूर-पूर्णान्तःकरणाय नमो नमः
चन्द्रशेखर-चित्ताब्जाह्लादकाय नमो नमः
पूरित-स्व-गुरूत्तंस-सङ्कल्पाय नमो नमः
त्रि-वारं चन्द्रमौलीश-पूजकाय नमो नमः
कामाक्षी-ध्यान-संलीन-मानसाय नमो नमः
सुनिर्मित-स्वर्ण-रथ-वाहिताम्बाय ते नमः
परिष्कृताखिलाण्डेशी-ताटङ्काय नमो नमः
रत्न-भूषित-नृत्येश-हस्त-पादाय ते नमः
वेङ्कटाद्रीश-करुणा-प्लाविताय नमो नमः
काश्यां श्री-कामकोटीशालय-कर्त्रे नमो नमः ४०
कामाक्ष्यम्बालय-स्वर्ण-च्छादकाय नमो नमः
कुम्भाभिषेक-सन्दीप्तालय-व्राताय ते नमः
कालट्यां शङ्कर-यशः-स्तम्भ-कर्त्रे नमो नमः
राजराजाख्य-चोलस्य स्वर्ण-मौलि-कृते नमः
गो-शाला-निर्मिति-कृत-गो-रक्षाय नमो नमः
तीर्थेषु भगवत्पाद-स्मृत्यालय-कृते नमः
सर्वत्र शङ्कर-मठ-स्थापकाय नमो नमः
वेद-शास्त्राधीति-गुप्ति-दीक्षिताय नमो नमः
देहल्यां स्कन्द-गिर्याख्यालय-कर्त्रे नमो नमः
भारतीय-कलाचार-पोषकाय नमो नमः ५०
स्तोत्र-नीति-ग्रन्थ-पाठ-रुचि-दाय नमो नमः
युक्त्या हरि-हराभेद-दर्शयित्रे नमो नमः
स्वभ्यस्त-नियमोन्नीत-ध्यान-योगाय ते नमः
पर-धाम-पराकाश-लीन-चित्ताय ते नमः
अनारत-तपस्याप्त-दिव्य-शोभाय ते नमः
शमादि-षड्-गुण-यत-स्व-चित्ताय नमो नमः

समस्त-भक्त-जनता-रक्षकाय नमो नमः
स्व-शारीर-प्रभा-धूत-हेम-भासे नमो नमः
अग्नि-तप्त-स्वर्ण-पट्ट-तुल्य-फालाय ते नमः
विभूति-विलसच्छुभ्र-ललाटाय नमो नमः ६०
परिव्राड्-गण-संसेव्य-पदाब्जाय नमो नमः
आर्तार्ति-श्रवणापोह-रत-चित्ताय ते नमः
ग्रामीण-जनता-वृत्ति-कल्पकाय नमो नमः
जनकल्याण-रचना-चतुराय नमो नमः
जनजागरणासक्ति-दायकाय नमो नमः
शङ्करोपज्ञ-सुपथ-सञ्चाराय नमो नमः
अद्वैत-शास्त्र-रक्षायां सुलग्नाय नमो नमः
प्राच्य-प्रतीच्य-विज्ञान-योजकाय नमो नमः
गैर्वाण-वाणी-संरक्षा-धुरीणाय नमो नमः
भगवत्-पूज्य-पादानामपराकृतये नमः ७०
स्व-पाद-यात्रया पूत-भारताय नमो नमः
नेपाल-भूप-महित-पदाब्जाय नमो नमः
चिन्तित-क्षण-सम्पूर्ण-सङ्कल्पाय नमो नमः
यथाज्ञ-कर्म-कृद्-वर्गोत्साहकाय नमो नमः
मधुराभाषण-प्रीत-स्वाश्रिताय नमो नमः
सर्वदा शुभमस्त्वित्याशंसकाय नमो नमः
चित्रीयमाण-जनता-सन्दृष्टाय नमो नमः
शरणागत-दीनार्त-परित्रात्रे नमो नमः
सौभाग्य-जनकापाङ्ग-वीक्षणाय नमो नमः
दुरवस्थित-हृत्-ताप-शामकाय नमो नमः ८०
दुर्योज्य-विमत-व्रात-समन्वय-कृते नमः
निरस्तालस्य-मोहाशा-विक्षेपाय नमो नमः
अनुगन्तृ-दुरासाद्य-पद-वेगाय ते नमः
अन्यानाज्ञात-सङ्कल्प-विचित्राय नमो नमः
सदा-हसन्मुखाब्जापनीताशेष-शुचे नमः

नवषष्टितमाचार्य-शङ्कराय नमो नमः
विविधाप्त-जन-प्रार्थ्य-स्व-गृहागतये नमः
जैत्र-यात्रा-व्याज-कृष्ट-जन-स्वान्ताय ते नमः
वसिष्ठ-धौम्य-सदृश-देशिकाय नमो नमः
असकृत्-क्षेत्र-तीर्थादि-यात्रा-तृप्ताय ते नमः ९०
श्री-चन्द्रशेखर-गुरोरेक-शिष्याय ते नमः
गुरोर्हृद्-गत-सङ्कल्प-क्रियान्वय-कृते नमः
गुरु-वर्य-कृपा-लब्ध-सम-भावाय ते नमः
योग-लिङ्गेन्दु-मौलीश-पूजकाय नमो नमः
वयोवृद्धानाथ-जनाश्रय-दाय नमो नमः
अवृत्तिकोपद्रुतानां वृत्ति-दाय नमो नमः
स्व-गुरूपज्ञया विश्वविद्यालय-कृते नमः
विश्व-राष्ट्रीय-सद्-ग्रन्थ-कोशागार-कृते नमः
विद्यालयेषु सद्-धर्म-बोध-दात्रे नमो नमः
देवालयेष्वर्चकादि-वृत्ति-दात्रे नमो नमः १००
कैलासे भगवत्पाद-मूर्ति-स्थापक ते नमः
कैलास-मानससरो-यात्रा-पूत-हृदे नमः
कामरूपे वेङ्कटाद्रि-नाथालय-कृते नमः
शिष्ट-वेदाध्यापकानां मानयित्रे नमो नमः
महारुद्रातिरुद्रादि-तोषितेशाय ते नमः
असकृच्छत-चण्डीभिरर्हिताम्बाय ते नमः
द्रविडागम-गातॄणां ख्यापयित्रे नमो नमः
शिष्ट-शङ्करविजय-स्वर्च्यमान-पदे नमः १०८

॥ इति शिमिळि-ग्रामाभिजन-राधाकृष्णशास्त्रि-विरचिता
श्रीमज्जयेन्द्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः सम्पूर्णा ॥


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

# आचार्यपरम्परानामावलिः

## ॥ पूर्वाचार्याः ॥

१. श्रीमते दक्षिणामूर्तये नमः
२. श्रीमते विष्णवे नमः
३. श्रीमते ब्रह्मणे नमः
४. श्रीमते वसिष्ठाय नमः
५. श्रीमते शक्तये नमः
६. श्रीमते पराशराय नमः
७. श्रीमते व्यासाय नमः
८. श्रीमते शुकाय नमः
९. श्रीमते गौडपादाय नमः
१०. श्रीमते गोविन्दभगवत्पादाय नमः
११. श्रीमते शङ्करभगवत्पादाय नमः

## ॥ भगवत्पादशिष्याः ॥

१. श्रीमते सुरेश्वराचार्याय नमः
२. श्रीमते पद्मपादाचार्याय नमः
३. श्रीमते हस्तामलकाचार्याय नमः
४. श्रीमते तोटकाचार्याय नमः
५. श्रीमते पृथिवीधवाचार्याय नमः
६. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः
७. अन्येभ्यः शङ्करभगवत्पाद-शिष्येभ्यो नमः

## ॥ कामकोटि-आचार्याः ॥

१. श्रीमते शङ्करभगवत्पादाय नमः
२. श्रीमते सुरेश्वराचार्याय नमः
३. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः

४. श्रीमते सत्यबोध-इन्द्रसरस्वत्यै नमः
५. श्रीमते ज्ञानानन्द-इन्द्रसरस्वत्यै नमः
६. श्रीमते शुद्धानन्द-इन्द्रसरस्वत्यै नमः
७. श्रीमते आनन्दज्ञान-इन्द्रसरस्वत्यै नमः
८. श्रीमते कैवल्यानन्द-इन्द्रसरस्वत्यै नमः
९. श्रीमते कृपाशङ्कर-इन्द्रसरस्वत्यै नमः
१०. श्रीमते विश्वरूप-सुरेश्वर-इन्द्रसरस्वत्यै नमः
११. श्रीमते शिवानन्द-चिद्घन-इन्द्रसरस्वत्यै नमः
१२. श्रीमते सार्वभौम-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
१३. श्रीमते काष्ठमौन-सच्चिद्घन-इन्द्रसरस्वत्यै नमः
१४. श्रीमते भैरवजिद्-विद्याघन-इन्द्रसरस्वत्यै नमः
१५. श्रीमते गीष्पति-गङ्गाधर-इन्द्रसरस्वत्यै नमः
१६. श्रीमते उज्ज्वलशङ्कर-इन्द्रसरस्वत्यै नमः
१७. श्रीमते गौड-सदाशिव-इन्द्रसरस्वत्यै नमः
१८. श्रीमते सुर-इन्द्रसरस्वत्यै नमः
१९. श्रीमते मार्तण्ड-विद्याघन-इन्द्रसरस्वत्यै नमः
२०. श्रीमते मूकशङ्कर-इन्द्रसरस्वत्यै नमः
२१. श्रीमते जाह्नवी-चन्द्रचूड-इन्द्रसरस्वत्यै नमः
२२. श्रीमते परिपूर्णबोध-इन्द्रसरस्वत्यै नमः
२३. श्रीमते सच्चित्सुख-इन्द्रसरस्वत्यै नमः
२४. श्रीमते कोङ्कण-चित्सुख-इन्द्रसरस्वत्यै नमः
२५. श्रीमते सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः
२६. श्रीमते प्रज्ञाघन-इन्द्रसरस्वत्यै नमः
२७. श्रीमते चिद्विलास-इन्द्रसरस्वत्यै नमः
२८. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
२९. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
३०. श्रीमते भक्तियोग-बोध-इन्द्रसरस्वत्यै नमः
३१. श्रीमते शीलनिधि-ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
३२. श्रीमते चिदानन्दघन-इन्द्रसरस्वत्यै नमः
३३. श्रीमते भाषापरमेष्ठि-सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः

३४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
३५. श्रीमते बहुरूप-चित्सुख-इन्द्रसरस्वत्यै नमः
३६. श्रीमते चित्सुखानन्द-इन्द्रसरस्वत्यै नमः
३७. श्रीमते विद्याघन-इन्द्रसरस्वत्यै नमः
३८. श्रीमते धीरशङ्कर-इन्द्रसरस्वत्यै नमः
३९. श्रीमते सच्चिद्विलास-इन्द्रसरस्वत्यै नमः
४०. श्रीमते शोभन-महादेव-इन्द्रसरस्वत्यै नमः
४१. श्रीमते गङ्गाधर-इन्द्रसरस्वत्यै नमः
४२. श्रीमते ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
४३. श्रीमते आनन्दघन-इन्द्रसरस्वत्यै नमः
४४. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
४५. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः
४६. श्रीमते सान्द्रानन्द-बोध-इन्द्रसरस्वत्यै नमः
४७. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
४८. श्रीमते अद्वैतानन्दबोध-इन्द्रसरस्वत्यै नमः
४९. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
५०. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५१. श्रीमते विद्यातीर्थ-इन्द्रसरस्वत्यै नमः
५२. श्रीमते शङ्करानन्द-इन्द्रसरस्वत्यै नमः

- श्रीमते अद्वैतब्रह्मानन्दाय नमः
- श्रीमते विद्यारण्याय नमः
- अन्येभ्यः विद्यातीर्थ-शङ्करानन्द-शिष्येभ्यो नमः

५३. श्रीमते पूर्णानन्द-सदाशिव-इन्द्रसरस्वत्यै नमः
५४. श्रीमते व्यासाचल-महादेव-इन्द्रसरस्वत्यै नमः
५५. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५६. श्रीमते सदाशिवबोध-इन्द्रसरस्वत्यै नमः
५७. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः

- श्रीमते सदाशिवब्रह्म-इन्द्रसरस्वत्यै नमः

५८. श्रीमते विश्वाधिक-आत्मबोध-इन्द्रसरस्वत्यै नमः

५९. श्रीमते भगवन्नाम-बोध-इन्द्रसरस्वत्यै नमः
६०. श्रीमते अद्वैतात्मप्रकाश-इन्द्रसरस्वत्यै नमः
६१. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६२. श्रीमते शिवगीतिमाला-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६३. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६५. श्रीमते सुदर्शन-महादेव-इन्द्रसरस्वत्यै नमः
६६. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६७. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६८. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६९. श्रीमते जयेन्द्रसरस्वत्यै नमः
७०. श्रीमते शङ्करविजयेन्द्रसरस्वत्यै नमः
७१. श्रीमते सत्य-चन्द्रशेखरेन्द्रसरस्वत्यै नमः

श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, नानाविधपरिमलपत्रपुष्पाणि समर्पयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, धूपमाघ्रापयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दीपं दर्शयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि। निवेदनानन्तरम् आचमनीयं समर्पयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, कर्पूरताम्बूलं समर्पयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मङ्गलनीराजनं दर्शयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रदक्षिणनमस्कारान् समर्पयामि।
श्री-जयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रार्थनाः समर्पयामि।

## ॥ गुरु-स्तुतिः ॥

भजेऽहं भगवत्पादं भारतीयशिखामणिम्।
अद्वैतमैत्रीसद्भावचेतनायाः प्रबोधकम्॥ १॥

अष्टषष्टितमाचार्यं वन्दे शङ्कररूपिणम्।
चन्द्रशेखरयोगीन्द्रं योगलिङ्गप्रपूजकम्॥ २॥

वरेण्यं वरदं शान्तं वदान्यं चन्द्रशेखरम्।
वाग्मिनं वाग्यतं वन्द्यं विशिष्टाचारपालकम्॥ ३॥

देवे देहे च देशे च भक्त्यारोग्यसुखप्रदम्।
बुधपामरसेव्यं तं श्रीजयेन्द्रं नमाम्यहम्॥ ४॥

वृत्तवृत्तिप्रवृत्तीनां कारणं करणं प्रभुम्।
गुरुं नौमि नताशेषनन्दनं नयकोविदम्॥ ५॥

प्रजाविचारधर्मेषु नेतारं निपुणं निधिम्।
वन्देऽहं शङ्कराचार्यं श्रीजयेन्द्रसरस्वतीम्॥ ६॥

सितासितसरिद्रत्नमज्जनं मन्त्रवित्तमम्।
दानचिन्तामणिं नौमि निश्चिन्तं नीतिकोकिलम्॥ ७॥

सरस्वतीगर्भरत्नं सुवर्णं साहसप्रियम्।
लक्ष्मीवत्सं लोलहासं नौमि तं दीनवत्सलम्॥ ८॥

गतिं भारतदेशस्य मतिं भारतजीविनाम्।
वन्दे यतिं साधकानां पतिमद्वैतदर्शिनाम्॥ ९॥

॥ इति श्रीशङ्करविजयेन्द्रसरस्वती-
शङ्कराचार्यस्वामिभिः विरचिता
श्री-जयेन्द्रसरस्वती-श्लोकमालिका॥

# ॥ स्वस्ति-वचनम्॥

- स्वस्ति श्रीमद्-अखिल-भूमण्डला·लङ्कार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमा·धिष्ठान-सत्यव्रत-नामाङ्कित-काञ्ची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्
- अतुलित-सुधा-रस-माधुर्य-कमला·सन-कामिनी-धम्मिल्ल-सम्फुल्ल-मल्लिका-मालिका-निःष्यन्द-मकरन्द-झरी-सौवस्तिक-वा·ङ्निगुम्फ-विजृम्भणा·नन्द-तुन्दिलित-मनीषि-मण्डलानाम्

- अनवरता·द्वैत-विद्या-विनोद-रसिकानां निरन्तरा·लङ्कृती-कृत-शान्ति-दान्ति-भूम्नाम्
- सकल-भुवन-चक्र-प्रतिष्ठापक-श्रीचक्र-प्रतिष्ठा-विख्यात-यशो·लङ्कृतानाम्
- निखिल-पाषण्ड-षण्ड-कण्टको·त्पाटनेन विशदी-कृत-वेद-वेदान्त-मार्ग-षण्मत-प्रतिष्ठापका·चार्याणाम्
- परमहंस-परिव्राजका·चार्य-वर्य-जगद्-गुरु-श्रीमत्-शङ्कर-भगवत्पादा·चार्याणाम्
- अधिष्ठाने सिंहासना·भिषिक्त-श्रीमद्-जयेन्द्र-सरस्वती-श्रीपादानाम्
- अन्तेवासि-वर्य-श्रीमत्-शङ्करविजयेन्द्र-सरस्वती-श्रीपादानां
- त·दन्तेवासि-वर्य-श्रीमत्-सत्य-चन्द्रशेखरे·न्द्र-सरस्वती-श्रीपादानां च
- चरण-नलिनयोः स-प्रश्रयं सा·ञ्जलि-बन्धं च नमस्कुर्मः॥

# ॥ तोटकाष्टकम्॥

विदिता·खिल-शास्त्र-सुधा-जलधे
महितो·पनिषत्-कथिता·र्थ-निधे।
हृदये कलये विमलं चरणं
भव शङ्कर देशिक मे शरणम्॥ १॥

करुणा-वरुणा·लय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचया·खिल-दर्शन-तत्त्व-विदं
भव शङ्कर देशिक मे शरणम्॥ २॥

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारु-मते।
कलये·श्वर-जीव-विवेक-विदं
भव शङ्कर देशिक मे शरणम्॥ ३॥

भव एव भवा·निति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शङ्कर देशिक मे शरणम्॥ ४॥

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीन·मिमं परिपालय मां
भव शङ्कर देशिक मे शरणम्॥५॥

जगती·मवितुं कलिता·कृतयो
विचरन्ति महा-महस·श्छलतः।
अहिमां·शु·रिवा·त्र विभासि पुरो*
भव शङ्कर देशिक मे शरणम्॥६॥

गुरु-पुङ्गव पुङ्गव-केतन ते
समता·मयतां न हि कोऽपि सुधीः।
शरणा·गत-वत्सल तत्त्व-निधे
भव शङ्कर देशिक मे शरणम्॥७॥


विदिता न मया विशदै·क-कला
न च किञ्चन काञ्चन·मस्ति गुरो।
द्रुत·मेव विधेहि कृपां सह-जां
भव शङ्कर देशिक मे शरणम्॥८॥
॥इति श्री-तोटकाचार्यविरचितं श्री-तोटकाष्टकं सम्पूर्णम्॥


[* गुरो इति पाठान्तरम्]

जय जय शङ्कर हर हर शङ्कर
जय जय शङ्कर हर हर शङ्कर।
काञ्ची-शङ्कर कामकोटि-शङ्कर
हर हर शङ्कर जय जय शङ्कर॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥
अनेन पूजनेन श्री-जयेन्द्र-सरस्वती-श्रीचरणाः प्रीयन्ताम्।
ॐ तत्सद्ब्रह्मार्पणमस्तु।

# ॥ विग्रहवान् धर्मः ॥





In our Shrimatham at Rameshvaram, the following verse has been inscribed in stone by our Jagadguru Shri Chandrashekharendra Sarasvati Shankaracharya Swami:

**एष सेतुर्विधरणो लोकासम्भेदहेतवे।**
**कोदण्डेन च दण्डेन रामेण गुरुणा कृतः॥**

The verse is based on a sentence in the Brihadaranyaka and Chandogya Upanishads. Its import is:

To reaffirm Dharma and prevent the world from instability, Shri Rama holding the Kodanda created this Setu which restrains even the sea. This is a physical representation of Dharma and shows that even such difficult feats are possible by standing in Dharma.

With the same goal, the Guru Shri Shankara Bhagavatpada, holding a Danda, created the Acharya Peetam. This is like a Setu holding against the sea of the changing world circumstances by standing in and teaching people Dharma.

As an exemplary illustration – the Rama Mandira at Ayodhya, expected by crores of Sanatana Vaidika Hindu Dharma Abhimani-s, had prana pratishtha successfully done and is now being further developed. Our Guru Shri Jayendra Sarasvati Shricharana had tirelessly worked for the same.

Let us meditate on and worship him remembering such multiple dharma karya-s that He performed.

## Other Bharat-wide dharmic acts of the Acharya

As per the saying "gurum prakāshayed dhīmān", Shri Jayendra Sarasvati Shricharana installed the vigraha of Shri Bhagavatpada in all the Jyotirlinga Kshetras that He had extolled.

Further He installed the divine form of Shri Bhagavatpada, the Jagadguru, in the four extremes of Bharat – Jagannatha, Kanyakumari, Gokarna seashores and Kailasa – facing the respective directions.

As per the wishes of His Guru Shri Chandrashekharendra Sarasvati Shricharana, He consoled the Sanatanis of the Kashmira Desha driven away from there, and took up laukika/vaidika efforts for their welfare.

Even in the North-East end of Bharat, He likewise did pratishtha of Shri Bhagavatpada and conducted laukika/vaidika dharma-s so that difficulty should not befall Sanatana Dharma.


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org